दशमः पाठः

# परिचयः

## षष्ठी विभक्तिः




आचार्यः – सर्वेषां स्वागतम्। मम नाम अविनाशः। भवतः नाम किम्?

गिरीशः – मम नाम गिरीशः।

आचार्यः – भवत्याः नाम किम्?

कविता – मम नाम कविता।

आचार्यः – गिरीश! तव परिवारस्य परिचयं वद।

गिरीशः – मम जनन्याः नाम अञ्जना। जनकस्य नाम राकेशः। अग्रजस्य नाम अवधेशः। अनुजस्य नाम शशाङ्कः। भगिन्याः नाम मालिनी। मातुलस्य नाम आनन्दः।

आचार्यः – कविते! तव विद्यालयस्य परिचयं कथय।

कविता – मम विद्यालयस्य नाम स्वामीविवेकानन्दविद्यालयः अस्ति। अयं नगरस्य मध्ये स्थितः अस्ति। एतस्य पुरतः उद्यानम् अस्ति। पृष्ठतः क्रीडाङ्गणम् अस्ति। क्रीडाङ्गणस्य वामतः मन्दिरे स्तः। दक्षिणतः भवनानि सन्ति।

आचार्यः – गिरीश! षष्ठवर्गस्य संस्कृतपुस्तकम् आनय। संस्कृतभाषायाः पदानि मधुराणि सन्ति। एषा वेदानाम्, उपनिषदां, शास्त्राणां च भाषा अस्ति। रामायण-महाभारतयोः कथा संस्कृते लिखिता अस्ति।

छात्राः – महोदय! संस्कृतभाषायाः पठने अस्माकं रुचिः अस्ति। वयं एतस्याः अध्ययनम् इच्छामः।

आचार्यः – आम्! सर्वेषां शिष्याणाम् इच्छानुसारं संस्कृतं पाठयामि।

ताराणां भूषणं चन्द्रः नारीणां भूषणं पतिः।
पृथिव्याः भूषणं राजा विद्या सर्वस्य भूषणम्।।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| परिवारस्य | = परिवार का | जनन्याः | = माता का |
| जनकस्य | = पिता का | अग्रजस्य | = बडे भाई का |
| अनुजस्य | = छोटे भाई का | मातुलस्य | = मामा का |
| क्रीडाङ्गणस्य | = खेल के मैदान का | ताराणाम् | = तारों का |
| भूषणम् | = आभूषण | नारीणाम् | = नारियों का |
| पृथिव्याः | = भूमि का | सर्वस्य | = सभी का |
| पुरतः | = आगे | पृष्ठतः | = पीछे |
| वामतः | = बाईं ओर | दक्षिणतः | = दाईं ओर |

## अभ्यासः

१. एकवाक्येन उत्तरं लिखत–

(क) चन्द्रः कासां भूषणम् अस्ति?

(ख) संस्कृतस्य पठने केषां रुचिः अस्ति?

(ग) अवधेशः कस्य अग्रजः अस्ति?

(घ) कस्य पुरतः उद्यानम् अस्ति?

(ङ) भवतः/भवत्याः नाम किम्?

२. षष्ठीविभक्तिं योजयित्वा रिक्तस्थानं पूरयत–

(क) ................. नाम अविनाशः। (आचार्य)

(ख) .................. आचार्यः अविनाशः। (कविता-गिरीश)

(ग) .................... पदानि मधुराणि। (संस्कृतभाषा)

(घ) संस्कृतं ............. भाषा। (शास्त्र)

(ङ) गिरीशस्य .................... नाम अञ्जना अस्ति। (जननी)

३. चित्रं पश्यत। सम्बन्धवाचकवाक्यानि पठत–




विश्वामित्रस्य शिष्यः।

दशरथस्य पुत्रः।

रावण-कुम्भकर्णयोः संहारकः।

भरत-लक्ष्मण-शत्रुघ्नानाम् अग्रजः।

सीतायाः पतिः।

अयोध्यायाः नृपः।

अहल्या-शबर्योः मोक्षदायकः।

कौसल्या-सुमित्रा-कैकय्यीनां पुत्रः।

४. चित्रं दृष्ट्वा सम्बन्धवाचकवाक्यानि लिखत–

यथा– श्रीकृष्णः वसुदेवस्य पुत्रः



५. योग्यरूपं चित्वा रिक्तस्थानं पूरयत–

(क) शिवः .................. पतिः। (पार्वत्याः/पार्वतीनाम्)

(ख) हस्तः ............... अङ्गम्। (शरीरेण/शरीरस्य)

(ग) तत् मम ............... गृहम्। (मित्रम्/मित्रस्य)

(घ) भोपालनगरं ............... राजधानी। (मध्यप्रदेशस्य/मध्यप्रदेशेन)

(ङ) वयं .................. अध्ययनम् इच्छामः। (भारतीयविद्याम्/भारतीयविद्यायाः)

६. रिक्तस्थानानि पूरयित्वा परिचयं लिखत–

(क) अहं ................ पुत्रः।

(ख) अहं ................ भागिनी/भ्राता।

(ग) सा ............. माता।

(घ) तस्याः नाम ...................।

७. कोष्ठकात् सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत–

| तस्य, तेषाम्, तयोः, तासाम्, तस्याः |
|---|

(क) सः श्रवणः।................ माता पूर्णिमा।

(ख) सा दीक्षा। .................अनुजः श्रवणः।

(ग) तौ भगिनीभ्रातारौ। ............... पिता नारायणः।

(घ) ते भ्रमणार्थं काशीम् अगच्छन्। ................ गृहं ग्वालियरनगरे अस्ति।

(ङ) दीक्षा बालिकाभिः सह गायति। ................ गीतं मधुरम् अस्ति।

योग्यताविस्तारः –

- अधोलिखितवाक्यानि पठत–

(क) दशरथपुत्रः - दशरथस्य पुत्रः।

(ख) रामायण-महाभारतकथा - रामायण-महाभारतयोः कथा।

(ग) विद्यालयः - विद्यायाः आलयः

(घ) सीतापतिः - सीतायाः पतिः।

(ङ) अयोध्यापतिः - अयोध्यायाः पतिः

(च) संस्कृतभाषापदानि - संस्कृतभाषायाः पदानि।